श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ भाग्यसूक्तम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ भाग्यसूक्तम् ॥

प्रा॒तर॒ग्निं प्रा॒तरिन्द्र॑ग्ं हवामहे।
प्रा॒तर्मि॒त्रावरु॑णा प्रा॒तर॒श्विना᳚।
प्रा॒तर्भग॑ं पू॒षणं॒ ब्रह्म॑ण॒स्पति᳚म्।
प्रा॒तः सोम॑मु॒त रु॒द्रग्ं हु॑वेम।
प्रा॒त॒र्जि॒तं भग॑मु॒ग्रग्ं हु॑वेम॥ 1॥

व॒यं पु॒त्रमदि॑ते॒र्यो वि॑ध॒र्ता।
आ॒ध्रश्चि॒द्यं मन्य॑मानस्तु॒रश्चि॑त्।
राजा॑चि॒द्यं भग॑ं भ॒क्षीत्याह॑।
भग॒ प्रणे॑त॒र्भग॒ सत्य॑राधः।
भगे॒मां धिय॒मुद॑व॒दद॑न्नः।
भग॒ प्रणो॑ जनय॒ गोभि॒रश्वै᳚ः।
भग॒ प्रनृभि॑र्नृ॒वन्त॑स्स्याम।
उ॒तेदानीं॒ भग॑वन्तः स्याम।
उ॒त प्रपि॒त्व उ॒त मध्ये॒ अह्ना᳚म्॥ 2॥

pradeep kidambi dot com
sunder kidambi

उ॒तोदि॑ता मघव॒न्थ्सूर्य॑स्य।
व॒यं दे॒वाना॑ग्ं सु॒म॒तौ स्या॑म।
भग॑ ए॒व भग॑वाग्ं अस्तु देवाः॥ 3॥

तेन॑ व॒यं भग॑वन्तः स्याम।
तं त्वा॑ भग॒ सर्व॒ इज्जो॑हवीमि।
स नो॑ भग पुर ए॒ता भ॑वे॒ह।
सम॑ध्व॒रायो॒षसो॑ नमन्त।
द॒धि॒क्रावे॑व॒ शुच॑ये प॒दाय॑।
अ॒र्वा॒ची॒नं व॑सु॒विदं॒ भग॑ नः।
रथ॑मि॒वाश्वा॑ वा॒जिन॒ आव॑हन्तु।
अश्वा॑वती॒र्गोम॑तीर्न उ॒षास॑ः।
वी॒रव॑ती॒ः सद॑मु॒च्छन्तु भ॒द्राः।
घृ॒तं दुहा॑ना वि॒श्वत॒ः प्रपी॑नाः।
यू॒यं पा॑त स्व॒स्तिभि॒ः सदा॑ नः॥ 4॥

ओं शान्ति॒ः शान्ति॒ः शान्ति॑ः॥

॥ इति भाग्यसूक्तं समाप्तम्॥

sunder kidāmbi prapatti dot com sunder kidāmbi